## निर्देशाः :

## Instructions :

**(i)** अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
इस प्रश्न-पत्र में चार खण्ड हैं।
The question paper has four sections.

**(ii)** प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे।
The answers to each section must be written at one place.

**(iii)** प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी।
Write the question number according to the question paper.

**(iv)** सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
सभी प्रश्नों के उत्तर संस्कृत में लिखिए।
Answer all the questions in Sanskrit.

## खण्डः-क (SECTION - A)

## अपठितांश-अवबोधनम् (अपठितांश अवबोधन)

## Unseen Reading Comprehension

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :**
**निम्नलिखित अनुच्छेद को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :**
**Read the following passage and answer the given questions in Sanskrit :**

क्रोधः मनुष्यस्य महान् शत्रुः। क्रुद्धः जनः गुरून् अपि निन्दति, अपभाषणं करोति, ज्येष्ठानां हितवचनानि अपि न श्रृणोति। तस्माद् वयं क्रोधे सावधानाः भवेम। यदि क्रोधः आगच्छति तदा तस्मिन् एव क्षणे मौनं धारणीयम्। मौनेन मनः शान्तं भवति। वाणी अपि नियन्त्रिता भवति। ईदृशे काले किञ्चित् पुस्तकं गृहीत्वा पठेम। कोपात् सर्वदा आत्मानं रक्षेम।

**प्रश्नाः**

**(I)** एकपदेन उत्तरत।
एक शब्द में उत्तर दीजिए।
Answer in one word.

**(i)** क्रोधे आगते किं धारणीयम् ?
**(ii)** क्रुद्धः जनः केषां हितवचनानि न श्रृणोति ?

**(II)** पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए।
Answer in a complete sentence.

**(i)** मनुष्यस्य महान् शत्रुः कः ?
**(ii)** मौनेन वाणी कीदृशी भवति ?

**(III) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत :**
**दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए :**
**Choose and write the appropriate answer from the given options:**

**(क) 'क्रुद्धः' इति कस्य पदस्य विशेषणम् ?**
(i) गुरोः (ii) जनस्य
(iii) शत्रोः (iv) ज्येष्ठस्य।

**(ख) 'भवेम' इति क्रियापदस्य किं कर्तृपदं गद्यांशे प्रयुक्तम् ?**
(i) जनः (ii) वाणी
(iii) क्रोधः (iv) वयम्।

**(ग) 'सर्वस्मिन् काले' इत्यर्थे किम् अव्ययपदं गद्यांशे प्रयुक्तम् ?**
(i) सर्वदा (ii) □□□□□□□□□□□
(iii) तस्मिन् एव (iv) अपि।

**(घ) 'असावधानाः' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?**

(i) □□□□□□□□□□□□ (ii) सर्वदा
(iii) सावधाना: (iv) शान्तम्।

**(IV)** अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत :
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए :
Write the appropriate title for this passage in Sanskrit:

**2. अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत।**
**निम्नलिखित श्लोक को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए।**
**Read the following shloka and answer the given questions in Sanskrit.**

प्राक्पादयो: पतति, खादति पृष्ठमांसं,
कर्णे कलं किमपि रौति शनैर्विचित्रम्।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्क:,
सर्वं खलस्य चरितं मशक: करोति।।

**प्रश्ना:**

**(I)** एकपदेन उत्तरत।
एक शब्द में उत्तर दीजिए।
Answer in one word.
पूर्वं पादयो: क: पतति ?

**(II)** पूर्णवाक्येन उत्तरत।
पूर्ण वाक्य में उत्तर दीजिए।
Answer in a complete sentence.
**(i)** मशक: कर्णे किं करोति ?
**(ii)** मशक: कस्य सर्वं चरितं करोति ?

**(III) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत :**
**दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए :**
**Choose and write the appropriate answer from the given options:**

**(क) श्लोके 'दुष्टस्य' इति पदस्य किं पर्यायपदं प्रयुक्तम् ?**
(i) निरूप्य (ii) खलस्य
(iii) चरितम् (iv) विचित्रम्।

**(ख) 'कटुकम्' इति पदस्य किं विलोमपदं श्लोके प्रयुक्तम् ?**
(i) छिद्रम् (ii) मांसम्
(iii) कलम् (iv) चरितम्।

## खण्ड:-ख (SECTION - B)

## रचनात्मककार्यम् (रचनात्मक कार्य)

## Writing Skills

**3. पितरं प्रति लिखितम् अध:पत्रं मञ्जूषाप्रदत्तशब्दै: पूरयित्वा पुन: लिखत :**
**पिता को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिए गए शब्दों की सहायता से पूर्ण कर पुनः लिखिए :**
**Complete the following letter, written to your father, with the help of the words given in the box and rewrite the same :**

ब्रह्मपुत्र-छात्रावास:,
(i) ____________
तिथि: ____________

पूज्या: (ii) ___ !
सादरं प्रणामा:।
अत्र कुशलं तत्रास्तु। इदं विज्ञाय भवान् अतिप्रसन्न: भविष्यति यद् गतदिवसे अन्तर्विद्यालयीयभाषण प्रतिस्पर्धायां मया (iii) ___ स्थानं लब्धम्। क्रीडादिवसे (iv) ___ अहमेव प्रथम: आसम्। अस्मिन् वर्षे वार्षिकोत्सवे अहं नाट्याभिनयं (v) ___ ।
अयं वार्षिकोत्सव: आगामि-शुक्रवासरे (vi) ___ । विद्यालयस्य पक्षत: ह्य एव (vii) ___ प्रेषितम्। अहमपि (viii) ___ सूचयामि यद् भवान् मात्रा सह अवश्यम् आगच्छतु। मम (ix) ___ भविष्यति। मातृचरणयो: मम प्रणामा:।

GP edu

भवतः पुत्रः,
(x) ______ ।

**मञ्जूषा**

| |
|---|
| निमन्त्रणपत्रम्, धावनप्रतियोगितायाम्, नीरजः, भवन्तम्, उत्साहवर्धनम्, नवदिल्लीतः प्रथमम्, करिष्यामि, पितृमहोदयाः, आयोजयिष्यते। |

**4. अधःप्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया □□□□ वाक्यानि संस्कृतेन लिखत :**
**नीचे दिए गए चित्र का वर्णन मञ्जूषा में दिए गए शब्दों की सहायता से पाँच संस्कृत वाक्यों में कीजिए:**
**Describe the following picture in five Sanskrit sentences with the help of the words given in the box below :**



| मञ्जूषा |
|---|
| छात्राः, पादपानाम्, लक्ष्म्, कुर्वन्ति शिक्षकैः, पर्यावरणम्, सम्भूय, क्षेत्रे विशालम्, वृक्षारोपणम्, वनमहोत्सवः। |

**अथवा (OR)**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चसंस्कृतवाक्येषु एकम् अनुच्छेदं लिखत :**
**मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर पाँच संस्कृत वाक्यों में एक अनुच्छेद लिखिए :**
**Write a paragraph in five Sanskrit sentences on the following topic with the help of the words given in the box :**
**भारतीय - कृषकः**

| मञ्जूषा |
|---|
| अन्नम्, वपति, वर्षाजलम्, बीजानि, कृषिक्षेत्रेषु, पशवः शोचनीयदशा, आधुनिकसाधनैः, धनाभावेन, परिश्रमम्। |

## खण्डः-ग (SECTION C)
## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)
## Applied Grammar

**5. अधोलिखितवाक्येषु □□□□□□□□□□□□□□□□□ सन्धिं सन्धिच्छेदं वा कृत्वा लिखत :**
**निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि अथवा सन्धि-विच्छेद करके लिखिए :**
**Write the underlined words of the following sentences after joining or disjoining sandhis:**

**(i)** वैकुण्ठे <u>हरिः + शेते</u>।
**(ii)** आचारः परमो धर्मः <u>इति + एतत्</u> विदुषां वचः।
**(iii)** न <u>कुर्यादहितं</u> कर्म।
**(iv)** <u>गुरावागते</u> छात्राः तूष्णीम् अभवन्।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत :**
**निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए :**
**Choose and write the correct compounded or expounded forms of the underlined words in the following sentences:**

**(क) <u>प्रतिहतम् अन्तःकरणं यस्य सः</u> प्रच्छन्नभाग्यः अचिन्तयत्।**

(i) प्रतिहतम् अन्त:करणम्
(ii) प्रतिहतकरणम्
(iii) प्रतिहतान्तःकरणः।
**(ख) स: यथेच्छं फलानि खादति।**
(i) इच्छाम् अनतिक्रम्य
(ii) इच्छया सहितम्
(iii) इच्छाभि: समम्।
**(ग) वने पशव: पक्षिण: च निवसन्ति।**
(i) पशुपक्षी
(ii) पशुपक्षिणः
(iii) पशव: पक्षिण:।
**(घ) वृक्षे स: वानरः उपनीडं गच्छति।**
(i) नीडे नीडे
(ii) नीडेन सह
(iii) नीडस्य समीपम्।
**(ङ) पीताम्बर: हरि: क्षीरसागरे शेते।**
(i) पीतम् अम्बरं यस्य स:।
(ii) पीतम् अम्बरा यस्य
(iii) पीतानि अम्बराणि यस्या: सा।

7. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत :**
**निम्नलिखित वाक्यों में रेखांकित पदों के प्रकृतिप्रत्ययों को जोड़कर या पृथक् करके उचित उत्तर विकल्पों में से चुनकर लिखिए :**
**Write the underlined words of the following sentences after joining or disjoining suffixes to the roots or words, selecting the correct answer from the options given below :**
**(क) मनस: चञ्चल + तल् क: निरोद्धुं क्षम: ?**
(i) चञ्चलन्तम्
(ii) चञ्चलताम्
(iii) चञ्चलताया:।
**(ख) गच्छन्तं बालकं पश्य।**
(i) गम् + शतृ
(ii) गच्छ् + आन्
(iii) गच्छ् + अन्तम् ।
**(ग) गुरुं सेव् + शानच् छात्र: प्रसन्न  अस्ति।**
(i) सेवमाना
(ii) सेवमानम्
(iii) सेवमानः।
**(घ) परिश्रमस्य महत्त्वं सर्वे जानन्ति।**
(i) मह + त्वम्
(ii) महत् + वम्
(iii) महत् + त्व।
**(ङ) एषा मम पुत्र + ङीप् क्रीडति।**
(i) पुत्रा
(ii) पुत्री
(iii) पुत्रीम्।

8. **अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्तै: उचितै: अव्ययपदै: पूरयित्वा लिखत :**
**निम्नलिखित वाक्यों में रिक्तस्थानों की पूर्ति मञ्जूषा में दिए गए उचित अव्यय पदों के द्वारा कीजिए :**
**Fill in the blanks in the following sentences with appropriate indeclinable words given in the box:**

**(i)** सः ___ वाराणसीं गमिष्यति ।
**(ii)** त्वम् ___ समागतोऽसि।
**(iii)** ग्रामात् ___ एकं सुन्दरम् उद्यानम् अस्ति।
**(iv)** ___ परोपकारः क्रियते तावत् शरीरस्य उपयोगः।
**(v)** ध्वनिं ___ कुरु।

**मञ्जूषा**

| बहिः, मा, किमर्थम्, यावत्, कुतः |
|---|

**9. उचितसंख्यापदं चित्वा वाक्यानि पूरयत।**
**उचित संख्यापद चुनकर वाक्य पूर्ण कीजिए।**
**Choose the correct numerical words and complete the sentences.**
**(i)** मासे ___ दिनानि भवन्ति। (त्रिंशत्, त्रिंशताः, त्रिसत्)
**(ii)** ताः ___ स्त्रियः ग्रामं गच्छन्ति। (त्रयः, तिस्रः, त्रीणि)
**(iii)** ___ उद्याने विंशतिवृक्षाः आसन्। (एकस्याम्, एकस्मिन्, एकस्य)
**(iv)** तडागे ___ कमलानि विकसन्ति। (चतस्रः, चत्वारः, चत्वारि)
**(v)** ___ कोकिले कूजतः। (द्वे, द्वौ, द्वयोः)

**10. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा अशुद्धपदं संशोध्य लिखत :**
**निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध है। दिए गए विकल्पों में से उचित उत्तर चुनकर अशुद्ध पद को संशोधित कर लिखिए :**
Choose the correct answer from the given options and correct the underlined incorrect word in the following sentences:

**(क) जनाः ह्यः आपणं <u>गमिष्यन्ति</u>।**
(i) गमिष्यावः (ii) अगच्छन्
(iii) गच्छानि (iv) अगच्छताम्।

**(ख) सः <u>बालिका</u> क्रीडति।**
(i) बाला (ii) बालकः
(iii) बालकौ (iv) बालिके ।

**(ग) त्वं कदा नाटकं <u>द्रक्ष्यन्ति</u> ?**
(i) पश्यन्ति (ii) पश्यावः
(iii) द्रक्ष्यसि (iv) पश्यथ।

**(घ) त्वम् मम <u>मित्रः</u> असि।**
(i) मित्रम् (ii) मित्रौ
(iii) मित्रा (iv) मित्राः।

**(ङ) अहं <u>नेत्रयोः</u> पश्यामि।**
(i) नेत्रेभ्यः (ii) नेत्रैः
(iii) नेत्रेषु (iv) नेत्राभ्याम्।

**(च) पाठ्यपुस्तके द्वादश <u>पाठानि</u> सन्ति।**
(i) पाठे (ii) पाठेषु
(iii) पाठाः (iv) पाठान्।

## खण्डः घ (SECTION - D)
## पठित-अवबोधनम् (पठित-अवबोधन)
## Reading Comprehension

**11. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत :**
**निम्नलिखित गद्यांश, पद्य और नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए :**
**Read the following prose, poetry and drama passage and answer the given questions in Sanskrit :**
**(अ) गद्यांश :**

"परशुरामकुण्डं तु लोहितनद्या: किञ्चिद् दूरे अस्ति। पूर्वम् इदं ब्रह्मकुण्डम् आसीत्। इदं लोहितनद्या: उद्गमस्थलम् इति मन्यते। अत्र अनेकानि अन्यानि दर्शनीयानि स्थलानि अपि सन्ति। अस्माकं पर्यटनविभागेन प्रकाशितां केषाञ्चित् प्रसिद्ध-स्थलानां सूचीं पठित्वा ज्ञायताम् इमानि पर्यटनस्थलानि। एतेषां दर्शनाय सम्पूर्णा व्यवस्था वर्तते। कार्यक्रमस्तु सुनिश्चितः।"

**प्रश्ना:**

**(I)** एकपदेन उत्तरत।
एक शब्द में उत्तर दीजिए।
Answer in one word.
परशुरामकुण्डं कस्या: उद्गमस्थलं मन्यते ?

**(II)** पूर्णवाक्येन उत्तरत।
पूर्ण वाक्य में उत्तर दीजिए।
Answer in a complete sentence.
केषां दर्शनाय सम्पूर्णा व्यवस्था वर्तते ?

**(III) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत :**
**दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए :**
**Choose and write the correct answer from the given options:**

**(क) 'व्यवस्था' इति कर्तृपदस्य किं क्रियापदं गद्यांशे प्रयुक्तम् ?**
(i) आसीत् (ii) वर्तते
(iii) मन्यते (iv) अस्ति ।

**(ख) 'एतेषाम्' इति सर्वनामपदं केभ्य: प्रयुक्तम् ?**
(i) कार्यक्रमेभ्य:
(ii) कुण्डेभ्य:
(iii) पर्यटनस्थलेभ्य:
(iv) उद्गमस्थलेभ्य:।

**(आ) पद्यम् :**
"पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञा।।"

**प्रश्ना:**

**(I)** एकपदेन उत्तरत।
एक शब्द में उत्तर दीजिए।
Answer in one word.
पिता कदा पुत्राय विद्याधनं यच्छति ?

**(II)** पूर्णवाक्येन उत्तरत।
पूर्ण वाक्य में उत्तर दीजिए।
Answer in a complete sentence.
किं धनं महत् अस्ति ?

**(III) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत :**
**दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए :**
**Choose and write the correct answer from the given options**

**(क) 'अस्य' इति सर्वनामपदं श्लोके कस्मै प्रयुक्तम् ?**
(i) पित्रे (ii) तपसे
(iii) पुत्राय (iv) बाल्याय।

**(ख) 'महत्' इतिपदं कस्य पदस्य विशेषणम् ?**
(i) पिता (ii) विद्याधनम्
(iii) पुत्राय (iv) तप:।

**(इ) नाट्यांश :**
काक: रे परभृत ! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्यु: पिका: ? अत: अहमेव करुणापर:।
राजहंस: शान्तं पापम्। अहमेव नीरक्षीरविवेकी पक्षिणां राजा।
बक: धिक् युष्मान्, अहमेव सर्वशिरोमणि:। (तत: प्रविशति प्रकृतिमाता)

प्रकृति: (सस्नेहम्) अलम् अलम् मिथ: कलहेन। अहं प्रकृति: एव युष्माकं जननी। यूयं सर्वे मम प्रिया:। सर्वेषामेव महत्त्वं विद्यते यथासमयम्। सर्वै: एव मे शोभा। न तावत् कलहेन समयं वृथा यापयेत।"

**प्रश्ना:**

**(I)** एकपदेन उत्तरत।

एक शब्द में उत्तर दीजिए।

Answer in one word.

पिकस्य सन्ततिं क: पालयति ?

**(II)** पूर्णवाक्येन उत्तरत।

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

सर्वै: एव कस्या: शोभा वर्तते ?

**(III) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत :**

**दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए :**

**Choose and write the correct answer from the given options:**

**(क) 'करुणापर:' इति कस्य विशेषणम् ?**

(i) बकस्य (ii) काकस्य

(iii) राजहंसस्य (iv) पिकस्य।

**(ख) नाट्यांशे 'परस्परम्' इति पदस्य समानार्थकं किम् अव्ययपदं प्रयुक्तम् ?**

(i) अलम् (ii) तर्हि

(iii) मिथः (iv) एव।

**12. अधोलिखितकथनानां समुचितं भावं विकल्पेभ्य: चित्वा लिखत :**

**निम्नलिखित कथनों का समुचित भाव विकल्पों में से चुनकर लिखिए :**

**Choose and write the correct gist of the following sentences from the given options :**

**(क) 'सर्वथा जागरूकोऽहं छात्राणां कृते आदर्शः एव।'**

(i) काक: छात्र इव जागरूक: भवेत्।

(ii) काक: सदैव जागरूक: भवति। तस्य इयं जागरूकता छात्राणां कृते आदर्श: एव।

(iii) काक: सदैव छात्राणां कृते जागरणं करोति।

**(ख)** 'नीरक्षीरविवेके तु हंसो हंस: बको बक:।'

(i) हंस: क्षीरं पिबति, बक: क्षीरं पिबति।

(ii) हंसस्य बकस्य च वर्ण: श्वेत: भवति।

(iii) दुग्धस्य जलस्य च मध्ये किं दुग्धम् किं च जलम् ?

इति विवेकपूर्णे कार्ये एव हंसस्य बकस्य च भेद: □□□□□□□□ ।

**13. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत :**

**मञ्जूषा में से समुचित पद चुनकर निम्नलिखित दोनों श्लोकों के अन्वय को पूर्ण कीजिए :**

**Complete the prose order of the following two shlokas by choosing the appropriate words given in the box:**

**(क)** "जलबिन्दुनिपातेन क्रमशः पूर्यते घट:।

स हेतु: सर्वविद्यानां धर्मस्य च धनस्य च।।"

अन्वयः - जलबिन्दुनिपातेन क्रमशः (i) ___ पूर्यते।

सर्वविद्यानां (ii) ___ च धनस्य च स:एव हेतु:।

**(ख)** "□□□□□□□ ब्रह्मशिरो यत्र □□□□□□□□□□□ बध्यते।

समा: द्वादशपर्जन्यस्तद् राष्ट्रं नाभिवर्षति।।"

अन्वय: - यत्र (i) ___ अस्त्रं □□□□□□□□□□□ बध्यते।

(ii) ___ द्वादशसमा: तद् राष्ट्रं न अभिवर्षति।

| मञ्जूषा |
|---|
| ब्रह्मशिर:, धर्मस्य, पर्जन्य:, घट:। |

**14. रेखाङ्कित पदानि आधृत्य प्रश्ननिर्माणं कुरुत।**
**रेखांकित पदों के आधार पर प्रश्ननिर्माण कीजिए।**
**Frame the questions on the basis of the underlined words.**

**(i)** □□□□□□□ सभायाम् अकातर: भवेत्।
**(ii)** मम पिच्छानाम् अपूर्वं सौन्दर्यम्।
**(iii)** ब्रह्मण: आयु: शतं वर्षाणि।
**(iv)** द्रौणिना द्रौपद्या: पुत्रा: हता:।
**(v)** प्रच्छन्नभाग्यस्य गृहम् मणीनाम् आभया भासमानम् अभवत्।

**15. अधोलिखितवाक्यानि घटनाक्रमानुसारेण लिखत :**
**निम्नलिखित वाक्यों को घटनाक्रम के अनुसार लिखिए :**
**Write the following sentences in their sequential order :**

**(i)** कर्मपुरनाम्नि नगरे प्रच्छन्नभाग्यनामकः कश्चित् कुमारः आसीत्।
**(ii)** मार्ग: बहुभि: गर्तै: परिपूर्ण: आसीत्।
**(iii)** एक: उद्दण्ड: बालक: अवदत्-भवन्तौ किमर्थं सुपथं परित्यज्य कुपथेन गन्तुं प्रवृत्तौ?
**(iv)** प्रच्छन्नभाग्य: बाल्यकाले विद्यां न □□□□□□□□□□□।
**(v)** तौ धनहरणार्थं ग्रामान्तरं प्रस्थितौ।
**(vi)** तौ मिलित्वा चौरकार्यं कुरुतः स्म।
**(vii)** प्रच्छन्नभाग्य: दुष्टबुद्धे: संगत्या चौर: अभवत्।
**(viii)** तौ मार्गे क्रीडत: बालकान् दृष्ट्वा अवदताम् -
भो: किमर्थं विषमे मार्गे क्रीडथ ?

**16. रेखाङ्कितपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत।**
**रेखांकित पदों के प्रसंगानुसार अर्थ चुनकर लिखिए।**
**Choose and write the contextual meanings of the underlined words.**

**(क) 'साधु पृष्टम्! अत्र अनेके प्रमुखोत्सवाः।'**
(i) श्रेष्ठः जनः
(ii) उचितम्
(iii) सज्जनः।

**(ख) '□□□□□□□□□□□□□□□□□□ अर्थं वेद स परः कवि:।'**
(i) वेदग्रन्थ:
(ii) ज्ञानम्
(iii) ज्ञातवान्।

**(ग) 'कम्पते सकला मही।'**
(i) महीपाल:
(ii) पृथिवी
(iii) महीरुह:।